# Shri Raghavendra Mantravidhivarnanam

# શ્રીરાઘવેન્દ્રમન્ત્રવિધિવર્ણનમ્

## Document Information

Text title : Shri Raghavendra Mantravidhivarnanam

File name : rAghavendramantravidhivarNanam.itx

Category : deities_misc, gurudev, mantra

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2021

*sanskritdocuments.org*

# શ્રીરાઘવેન્દ્રમન્ત્રવિધિવર્ણનમ્

અથ મન્ત્રવિધિં વક્ષ્યે રાઘવેન્દ્રાર્યસદ્ગુરોઃ ।
જપેન યસ્ય મન્ત્રસ્ય ગુરુરિષ્ટં પ્રયચ્છસિ ॥ ૧॥

હરૌ રુષ્ટે ગુરુસ્ત્રાતા ગુરૌ રુષ્ટે ન કશ્ચન ।
ગુરૌ તુષ્ટે હરિસ્તુષ્ટો ગુરુદ્વારા વિમુક્તિદઃ ॥ ૨॥

ઉત્તમાદુત્તમા સિદ્ધિઃ ધર્મમોક્ષાદિષુ સ્ફુટમ્ ।
તત્તસ્માદુત્તમાચાર્યે લબ્ધે નાઽતોઽવરં વ્રજેત્ ॥ ૩॥

એકસ્ય શિષ્યતાં પ્રાપ્ય ન તદાજ્ઞાં વિના સમમ્ ।
અવરં વા વ્રજેદુચ્ચગુણશ્ચેન્નૈવ દુષ્યતિ ॥ ૪॥

નરાણાં સ્થૂલદૃષ્ટીનાં શાસ્ત્રજ્ઞાનાધિકાઃ સ્વતઃ ।
તદનુગ્રહાચ્ચ યા વિદ્યા સ્વરૂપોદ્ધારિણી ભવેત્ ॥ ૫॥

ગુરુપ્રસાદો બલવાન્ પ્રસાદાત્ શ્રીહરેરપિ ।
અપાસિતોઽપિ ભગવાન્ પ્રસન્નો યેન મુક્તિદઃ ॥ ૬॥

યસ્તારતમ્યવેત્તા સ્યાદ્ગુરૂણાં દેવતાસ્વપિ ।
ભક્તિમાન્ ગુરદેવેષુ તદ્ભક્તેષુ ચ સિધ્યતિ ॥ ૭॥

અવજ્ઞાતા ગુરૂણાં ચ દેવતાનાં ન સિધ્યતિ ।
પ્રયાતિ ચ તમો ઘોરમિત્યાદિબહુવાક્યતઃ ॥ ૮॥

ગુરોરનુગ્રહં મુખ્યં સમ્પ્રાપ્ય સુખવાન્ ભવેત્ ।
અતો ભૂલોકમધ્યેઽસ્મિન્ પ્રત્યક્ષફલદાયિનઃ ॥ ૯॥

રાઘવેન્દ્રગુરોઃ સ્તોત્રં મન્ત્રં કવચમુચ્યતે ।
અપ્પણાર્યેણ કથિતં લોકાનુગ્રહકાઙ્ક્ષયા ॥ ૧૦॥

લક્ષ્મીઃ સદીર્ઘાગ્નિધર્મ સાધરોષ્ઠામ્બરામૃતમ્ ।
દત્તો વાયુશ્ચ હૃદયં મનુરષ્ટાક્ષરો ગુરોઃ ॥ ૧૧॥

ષડઙ્ગન્યાસઃ -
વિના તુ હૃદયં ષડ્ભિઃ વર્ણૈરઙ્ગમુદાહૃતમ્ ।
દ્વિરાવૃત્તૈઃ મન્ત્રપદૈઃ ષડઙ્ગાન્યથવા વિદુઃ ॥ ૧૨॥

તૈરેવ તુ દ્વિરાવૃત્તૈઃ ક્રમવત્ક્રમતોઽથવા ।
તપ્તકાઞ્ચનસઙ્કાશમક્ષમાલાં કમણ્ડલુમ્ ॥ ૧૩॥

દોર્ભ્યાં દધાનં કાષાયવસનં રામમાનસમ્ ।
યોગીન્દ્રતીર્થવન્દ્યાઙ્ઘ્રિં તુલસીદામવક્ષસમ્ ॥ ૧૪॥

જ્ઞાનભક્તિતપઃપૂર્ણં ધ્યાયેત્ સર્વાર્થસિદ્ધયે ।
મન્ત્રેણૈવ પ્રકર્તવ્યં દિશાં બન્ધશ્ચ મોચનમ્ ॥ ૧૫॥

લક્ષાણ્યષ્ટૌ દ્વાદશ વા પુરશ્ચર્યાપરો જપેત્ ।
અન્યો વાઽષ્ટોત્તરશતં સહસ્રં પ્રત્યહં જપેત્ ॥ ૧૬॥

કૃતાકૃતં ચ હોમાદિ પરસ્ત્રીવિમુખો ભવેત્ ।
બ્રાહ્મણારાધનં મુખ્યં યથાશક્તિ ઋણં વિના ॥ ૧૭॥

અઙ્ગન્યાસે દ્વિતીયે તુ ધ્યાનં વક્ષ્યામિ સદ્ગુરોઃ ।
શ્રીરાઘવેન્દ્રોપરિપાદકઞ્જનિષેવણાલ્લબ્ધસમસ્તસમ્પત્ ॥ ૧૮॥

દેવસ્વભાવો દિવિજદ્રુમોઽયમિષ્ટપ્રદો મે સતતં સ ભૂયાત્ ।
ન્યાસે તૃતીયે ધ્યાનં તુ પૂજાપટલ ઉચ્યતે ॥ ૧૯॥

અગ્નિઃ સુદીર્ઘબિન્દુશ્ચેન્મનુરેકાક્ષરોઽપરઃ ।
ષડ્દીર્ઘસ્વરયુક્તેન તેનૈવ સ્યાત્ ષડઙ્ગકમ્ ।
નિચૃદ્ગાયત્રીકાનુષ્ટુપ્ છન્દસી એતદાદ્યયોઃ ॥ ૨૦॥

શ્રીરાઘવેન્દ્રઃ સકલપ્રદાતા સ્વપાદકઞ્જદ્વયભક્તિમદ્ભ્યઃ ।
અઘાદ્રિસમ્ભેદનદૃષ્ટિવજ્રક્ષમા સુરેન્દ્રોઽવતુ માં સદાઽયમ્ ॥ ૨૧॥

દ્વે લક્ષે વાઽષ્ટલક્ષાણિ પુરશ્ચરા જપો મતઃ ।
ઇમૌ મન્ત્રૌ મન્ત્રરાજૌ મુખ્યમાપન્નિવારકૌ ॥ ૨૨॥

જયપ્રદૌ ચ વાક્સિદ્ધિપ્રદૌ પુત્રાદિકપ્રદૌ ।
કલૌ પ્રત્યક્ષફલદૌ શીઘ્રમેવ ધનપ્રદૌ ॥ ૨૩॥

ઋણાપહારકૌ રાજચોરપીડાદિશામકૌ ।
જનાનુરાગી લોકૈશ્ચ પૂજ્યો ભવતિ જાપકઃ ॥ ૨૪॥

જ્ઞાનવાન્ વાક્પટુર્દૈવશાલી દીર્ઘાયુરુત્તમઃ ।
ક્ષેમવાન્ કવિતાશાસ્ત્રગોષ્ઠીષુ ચ વિચક્ષણઃ ॥ ૨૫॥

બલવાન્ રૂપસમ્પન્નો નિર્મલાત્મા સુભક્તિમાન્ ।
કલત્રપુત્રબન્ધૂનામાનુકૂલ્યં ચ વિન્દતિ ॥ ૨૬॥

શત્રુવશ્યં ભવેત્તસ્ય સર્વસૌભાગ્યવર્ધનમ્ ।
વેદાન્તપારગઃ કીર્તિસમ્પન્નઃ સુદયાન્વિતઃ ॥ ૨૭॥

શાન્તક્રોધો નિર્મલાત્મા સર્વદેવપ્રિયો ભવેત્ ।
વૈરાગ્યવાન્ મહાત્યાગી ભોગી ધર્મવિચક્ષણઃ ।
કન્યાં લક્ષણસમ્પન્નાં પ્રાપ્નોતિ શ્રિયમુત્તમામ્ ॥ ૨૮॥

કિમત્ર બહુનોક્તેન ગુરુરાજકૃપાબલાત્ ।
સ ભવેત્ સિદ્ધસઙ્કલ્પઃ સર્વરોગવિવર્જિતઃ ॥ ૨૯॥

ભગવત્ જ્ઞાનભક્તિભ્યાં ભુક્તિં મુક્તિં ચ વિન્દતિ ।
સ્નાત્વા નિત્યાહ્નિકં કૃત્વા વૃન્દાવન ગતં ગુરુમ્ ॥ ૩૦ ॥

અથવા પાદુકાયાં ચ યન્ત્રે વાઽવાહયન્ જલે ।
અપ્પણાર્યકૃતસ્તુત્યા સ્નાપયિત્વા શુચિઃ સ્થિરઃ ॥ ૩૧॥

જપેત્ પશ્ચાત્ અપ્પણાર્યનામમન્ત્રં જપેદ્યથા ।
શ્રી અપ્પણાર્યાય નમ ઇત્થમષ્ટાક્ષરો મનુઃ ॥ ૩૨॥

યોગીન્દ્રતીર્થવન્દ્યાનિ તુલસીદામવક્ષસમ્ ।
જ્ઞાનભક્તિઃ તપઃ પૂર્ણં ધ્યાયેત્ સર્વાર્થસિદ્ધયે ॥ ૩૩॥

શ્રીરાઘવેન્દ્રગુર્વત્રિસંસક્તધિષણાગ્રણીઃ ।
અપ્પણ્ણાર્યગુરુર્ભૂયાદસ્મદિષ્ટાર્થસિદ્ધયે ॥ ૩૪॥

અઙ્ગન્યાસાદિનાસ્યાસ્તિ શતં વા દશ વા જપેત્ ।
માલાદિગાસનાદીનિ પ્રસિદ્ધાન્યેવ લોકતઃ ॥ ૩૫॥

અનેન ગુરુરાજસ્ય મન્ત્રઃ શીઘ્રેણ સિધ્યતિ ।
રાં બીજં વિલિખેત્ પૂર્વં ત્રિકોણં ત્વેકરેખયા ॥ ૩૬॥

વર્તુલં વેષ્ટયિત્વાઽથ પદ્મમષ્ટદલં લિખેત્ ।
તદ્દલેષુ ક્રમાન્મન્ત્રવર્ણાનિ વિલિખેદ્બુધઃ ॥ ૩૭॥

રેખાભ્યાં ભૂપુરં દ્વાભ્યામષ્ટદિક્ષુ શ્રિયં લિખેત્ ।

ત્રિભિરાવરણૈર્યુક્તં પૂજાયન્ત્રમિદં ગુરોઃ ॥ ૩૮॥

સાધ્યાર્ણાન્ વિલિખેત્ ધાર્યે ત્રિકોણે બીજસમ્પુટે ।
એવં મન્ત્રેણ યન્ત્રેણ ગુરુરાજપ્રસાદજૈઃ ॥ ૩૯॥

મનોરથૈઃ સમૃદ્ધઃ સ્યાદનેકે સન્તિ સાક્ષિણઃ ।
સ્વાનુભૂતં ચાહ સાક્ષાદવધૂતો ગુરોઃ સુતઃ ॥ ૪૦ ॥

સતતવિમલગાત્રં સદ્ગુણાનામમન્ત્રં
    દુરિતતૃણલવિત્રં દુર્મતધ્વાન્તમિત્રમ્ ।
ભજ કભરબહિત્રં મામકપ્રાણમિત્રં
    ગુરુમતુલચરિત્રં નૌમિ માં પાતુ પુત્રમ્ ॥ ૪૧॥

ઇતિ શ્રીમત્કૃષ્ણાવધૂતપણ્ડિતકૃતૌ શ્રીરાઘવેન્દ્રતન્ત્રે
    શ્રીરાઘવેન્દ્રમન્ત્રવિધિવર્ણનં નામ દ્વિતીયપટલઃ સમ્પૂર્ણઃ ।

Proofread by Gopalakrishnan, PSA Easwaran

---

*Shri Raghavendra Mantravidhivarnanam*

pdf was typeset on December 18, 2021

Please send corrections to *sanskrit@cheerful.com*